योगवासिष्ठः/प्रकरणम् ६ (निर्वाणप्रकरणस्य उत्तरार्धम्)/सर्गः ०४६

श्रीवसिष्ठ उवाच ।

परमार्थफले ज्ञाते मुक्तौ परिणतिं गते ।

बोधोऽप्यसद्भवत्याशु परमार्थो मनोमृगः ।। १

क्वापि सा मृगता याति प्रक्षीणस्नेहदीपवत् ।

परमार्थदशैवास्ते तत्रानन्तावभासिनी ।। २

ध्यानद्रुमफलप्राप्तौ बोधतामागतं मनः ।

वज्रसारां स्थितिं धत्ते छिन्नपक्ष इवाचलः ।।

मनस्ता क्वापि संयाति तिष्ठत्यच्छैव बोधता ।

निर्बाधा निर्विभागा च सर्वाऽखर्वात्मिका सती ।। ४

सुविविक्ततया चित्तसत्ता बोधतयोदिता ।

अनाद्यन्ता भवत्यच्छप्रकाशफलदायिनी ।। ५

स्वयमेव ततस्तत्र निरस्तसकलैषणम् ।

अनाद्यन्तमनायासं ध्यानमेवावशिष्यते ।। ६

यावन्नाधिगतं ब्रह्म न विश्रान्तं परे पदे ।

तावत्तन्मननत्वेन न ध्यानमवगम्यते ।। ७

परमार्थैकतामेन्य न जाने क्व मनो गतम् ।

क्व वासना क्व कर्माणि क्व हर्षामर्षसंविदः ।। ८

केवलं दृश्यते योगी गतो ध्यानैकनिष्ठताम् ।

स्थितो वज्रसमाधाने विपक्ष इव पर्वतः ।। ९

विरसाखिलभोगस्य प्रशान्तेन्द्रियसंविदः ।

नीरसाशेषदृश्यस्य स्वात्मारामस्य योगिनः ।। १०

क्रमेण विगलद्वृत्तेर्बलाद्विश्रान्तिमीयुषः ।

अर्थायातं समाधानं केन नाम विचार्यते ।। ११

तावद्विषयवैरस्यं भावयन्त्युचिताशयाः ।

न पश्यन्त्येव तान्यावद्भोगांश्चित्रनरो यथा ।। १२

अपश्यञ्जागतानर्थान्निर्वासनतयात्मवान् ।

बलाद्वज्रसमाधाने त्वन्येनेव निवेश्यते। ।। १३

प्रावृषीव नदीपूरो यः समाधिरुपस्थितः ।

बलादेव तमायातं भूयश्चलति नो मनः ।। १४

सर्वार्थशीतलत्वेन बलाद्ध्याने यदाऽऽगतम् ।

ज्ञानाद्विषयवैरस्य स समाधिर्हि नेतरः ।। १५

दृढं विषयवैरस्यमेव ध्यानमुदाहृतम् ।

तदेव परिपाकेन वज्रसारं भवत्यलम् ।। १६

तदेतद्भोगवैतृष्ण्यं ध्यानमङ्कुरितं हि तत् ।

तदेव पीठबन्धेन बद्धं भवति बन्धुरम् ।। १७

सम्यग्ज्ञानं समुच्छूनं सदैवोज्झिऽतवासनम् ।

ध्यानं भवति निर्वाणमानन्दपदमागतम् ।। १८

अस्ति चेद्भोगवैतृष्ण्यं किमन्यद्ध्यानदुर्धिया ।

नास्ति चेद्भोगवैतृष्ण्यं किमन्यद्ध्यानदुर्धिया ।। १९

दृश्यस्वदनमुक्तस्य सम्यग्ज्ञानवतो मुनेः ।

निर्विकल्पं समाधानमविरामं प्रवर्तते ।। २०

यस्मै न स्वदते दृश्यं स संबुद्ध इति स्मृतः ।

न स्वदन्ते यदा भोगाः सम्यग्बोधस्तथोदितः ।। २१

यस्य स्वभावविश्रान्तिः कथं तस्यास्ति भोगिता ।

अस्वभावो हि भोगित्वं तत्क्षये तत्कथं कुतः ।। २२

श्रुतपाठजपान्तेषु समाधिनिरतो भवेत् ।

समाधिविरतः श्रान्तः श्रुतपाठजपाञ्छ्रयेत् ।। २३

निर्वाणमामीत निरस्तखेदं समस्तशङ्कास्तमयाभिरामम् ।

सुषुप्तसौम्यं समशान्तचित्तं शरद्धनाभोगविशुद्धमन्तः ।। २४

इत्यार्षे श्रीवासिष्ठमहारामायणे वाल्मीकीये दे० मो० निर्वाणप्रकरणे उत्तरार्धे साम्यावबोधनो नाम षट्चत्वारिंशः सर्गः ।। ४६ ।।